# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर, २०१८

| | | |
|---|---|---|
| **कक्षा - शास्त्रितृतीयवर्षम्** (SEM-5) | **प्रश्नपत्रम् – ५**<br>(C.C.-3.5.9.) | **गुणाः - ७०** |
| **विषयः - नव्यन्यायः** | | |
| **दिनाङ्कः - ०८/१२/२०१८** | सन्दर्भग्रन्थः- सिद्धान्तलक्षणम् | **समयः -१०.०० तः ०१.००** |

**प्रथमान्वितिः**

**प्रश्नः १ निम्नलिखितेषु द्वौ समाधेयौ ।** **( १० )**

(१) साध्यसामानाधिकरण्यं व्याप्तिः । सोदाहरणं व्याख्यात ।

(२) यद्रूपं प्रतियोगितावच्छेदकभिन्नत्वं ग्राह्यम् । व्याख्यात ।

(३) इदं वाच्यं ज्ञेयत्वादित्यत्र अव्याप्तिमाशङ्क्य परिहरत ।

**प्रश्नः २ एकः समाधेयः ।** **( १० )**

(१) वह्निमान् धूमात्-इत्यत्र मणिकृतसिद्धान्तलक्षणं विशदयत ।

(२) दण्डिमान दण्डिसंयोगात् इत्यत्र परम्परासम्बन्धेन अव्याप्तिः निराक्रियताम् ।

**द्वितीयान्वितिः**

**प्रश्नः ३ निम्नलिखितेषु द्वौ समाधेयौ ।** **( १० )**

(१) हेतुतावच्छेदकसम्बन्धस्य सार्थक्यं स्पष्टयत ।

(२) मिश्रोक्तरीत्या सिद्धान्तलक्षणं प्रतिपादयत ।

(३) प्रतियोगितावच्छेकतावच्छेकत्वस्य सार्थक्यं ब्रूत ।

**प्रश्नः ४ एकः समाधेयः ।** **( १० )**

(१) उभयवृत्तिविशिष्टाधिकरणाप्रसिद्ध्या को दोषः ? सोदाहरणं विशदयत ।

(२) सामानाधिकरण्यव्यक्तीनां भेदेऽपि निरूपकतावच्छेदकस्याऽधिकरणतावच्छेदकस्य चैक्याद् व्याप्त्यैक्यम् । व्याख्यात ।

**तृतीयान्वितिः**

**प्रश्नः ५ निम्नलिखितेषु द्वौ समाधेयौ ।** **( १० )**

(१) व्याप्यवृत्तिसाध्यकस्थले प्रतियोग्यसामानाधिकरण्यस्य सार्थक्यं प्रतिपादयत ।

(२) संयोगाभावस्य केवलान्वयित्वं साधयत ।

(३) व्यासज्यवृत्तिधर्मानवच्छिन्नत्वविशेषणस्य सार्थक्यं स्पष्टयत ।

**प्रश्नः ६ एकः समाधेयः ।** **( १० )**

(१) साध्यादिभेदेन व्याप्तेर्भेदात् । इतीमां दीधितिं व्याख्यात ।

(२) प्रतियोगिसामानाधिकरण्यं च स्वप्रतियोग्यतावच्छेकावच्छिन्नासामानाधिकरण्यम् । दीधितिवचनं विशदयत ।

## चतुर्थान्वितिः

**प्रश्नः ७ निम्नलिखितप्रश्नेषु दश समाधेयाः ।** **( १० )**

(१) हेतुतावच्छेकसम्बन्धः कः ?

(२) द्रव्यकर्माण्यत्वविशिष्टसत्ता कुत्र वर्तते ?

(३) महानसीयवह्निभिन्नवह्निमान् धूमात् – इत्यत्र साध्यतावच्छेदकं किम् ?

(४) दण्डिमान् दण्डिसंयोगात्– इत्यत्र साध्यतावच्छेदकं किम् ?

(५) प्रथमपक्षे व्याप्तेः कथं भेदः ?

(६) दीधितिकृतं सिद्धान्तलक्षणं लिखत ।

(७) प्रतियोगितावच्छेदकसम्बन्धः कः ?

(८) रूपत्वव्याप्यजातिमद्वान् पृथिवीत्वात्. . . इत्यत्र पक्षसाध्यहेतून् निर्दिशत ।

(९) विभुविशेषगुणाः के ?

(१०) किन्नाम क्षणिकत्वम् ?

(११) गुणसामान्याभावः कुत्र वर्तते ?

(१२) अव्याप्यवृत्तिगुणः कः ?

(१३) गुणवान् द्रव्यत्वाद् इत्यत्र अव्याप्तिवारणाय किं प्रविष्टम् ?

(१४) किन्नाम मूर्तत्वम् ?

(१५) दीधितिकारः कः ?

--००--

# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

# सत्रान्तपरीक्षा -दिसम्बर्, २०१८

| | | |
|---|---|---|
| **कक्षा - शास्त्रितृतीयवर्षम्** (SEM-5) | **प्रश्नपत्रम् – ५** | |
| **विषयः - नव्य न्यायः** | (C.C.-3.5.9.) | **गुणाः - ७०** |
| **दिनाङ्कः - ०८/१२/२०१८** | सन्दर्भग्रन्थः- सिद्धान्तलक्षणम् | **समयः -१०.०० तः ०१.००** |

**उत्तराणि**

(१) येन सम्बन्धेन हेतुः स्वाधिकरणे वर्तते स सम्बन्धः हेतुतावतच्छेदकसम्बनधः ?

(२) द्रव्यकर्मान्यत्वविशिष्टसत्ता गुणे वर्तते ।

(३) महानसीयवह्निभिन्नत्ववह्नित्वम् ।

(४) दण्डिमान् दण्डिसंयोगात् – दण्डत्वं साध्यतावच्छेदम् ।

(५) सामानाधिकरण्यरुपतया भेदः ।

(६) प्रतियोग्यसमानाधिकरणयद्रुपविशिष्टसमानाधिकरणाभावप्रतियोगितानवच्छेदको यो धर्मः तद्धर्मावच्छिन्नेन येन केनापि समं सामानाधिकरण्यं तद्रूपविशिष्टस्य तद्धर्मावच्छिन्नयावन्निपरुपिताव्याप्तिः ।

(७) येन सम्बन्धेन प्रतियोगी सवाधिकरणे वर्तते स सम्बन्धः प्रतियोगितावच्छेकसम्बन्धः ।

(८) रूपत्वव्याप्यजातिमद्वान् पृथिवीत्वात् . . . .इत्यत्र पक्ष वृथिवी साधयः रूपत्वव्याप्यजातिमत्वम् हेतुः पृथिवीत्वम् ।

(९) शब्दबुद्धिसुखदुःखाद्वेषप्रयत्नधर्माधर्मासंस्कारः ।

(१०) तृतीयक्षणध्वंसप्रतियोगित्वं क्षणिकत्वम् ।

(११) गुणसामान्याभावः उत्पत्तिकालावच्छेदे द्रव्ये वर्तते ।

(१२) अव्याप्यवृत्तिगुणः संयोगः ।

(१३) गुणवान् द्रव्यत्वाद् इत्यत्र अव्याप्तिवारणाय प्रतियोग्यसमानाधिकरणत्वम् अभावविशेषणमुक्तम् ।

(१४) क्रियावत्वम् मूर्तत्वम् ।

(१५) दीधितिकारः रघुनाथशिरोमणिः ।

--००--